# Shri Tandaveshvara Stotram

# શ્રીતાણ્ડવેશ્વરસ્તોત્રમ્

## Document Information

Text title : Shri Tandaveshvara Stotram

File name : tANDaveshvarastotram.itx

Category : shiva, chandrashekharabhAratI

Location : doc_shiva

Author : chandrashekharabhAratI

Latest update : June 3, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીતાણ્ડવેશ્વરસ્તોત્રમ્

વૃથા કિં સંસારે ભ્રમથ મનુજા દુઃખબહુલે
    પદામ્ભોજં દુઃખપ્રશમનમરં સંશ્રયત મે ।
ઇતીશાનસ્સર્વાન્પરમકરુણાનીરધિરહો
    પદાબ્જં હ્યુદ્ધૃત્યાબુજનિભ કરેણોપદિશતિ ॥ ૧॥

સંસારાનલતાપતપ્ત હૃદયાસ્સર્વે જવાન્મત્પદં
    સેવધ્વં મનુજા ભયં ભવતુ મા યુષ્માકમિત્યદ્રિશઃ ।
હસ્તેઽગ્નિં દધદેષ ભીતિહરણં હસ્તં ચ પાદામ્ભુજં
    હ્યુદ્ધૃત્યોપદિશત્યહો કરસરોજાતેન કારુણ્યધિઃ ॥ ૨॥

તાણ્ડવેશ્વર તાણ્ડવેશ્વર તાણ્ડવેશ્વર પાહિ મામ્ ।
તાણ્ડવેશ્વર તાણ્ડવેશ્વર તાણ્ડવેશ્વર રક્ષ મામ્ ॥ ૩॥

ગાણ્ડિવેશ્વર પાણ્ડવાર્ચિત પઙ્કજાભપદદ્વયં
    ચણ્ડમુણ્ડવિનાશિની હૃત વામભાગમનીશ્વરમ્ ।
દણ્ડપાણિ કપાલ ભૈરવ તણ્ડુમુખ્ય ગણૈર્યુતં
    મણ્ડિતાખિલ વિનષ્ટપં વિજિતાન્ધકં પ્રણમામ્યહમ્ ॥ ૪॥

ભાસમાન શરીર કાન્તિ વિભાસિતાખિલ વિષ્ટપં
    વાસવાદ્યમૃતાશસેવિત પાદપઙ્કજ સંયુતમ્ ।
કાસમાન મુખારવિન્દ જિતામૃતાંશુમશેષહૃત્
    વાસતાણ્ડવ શઙ્કર સકલાઘનાશકમાશ્રયે ॥ ૫॥

મેરુપર્વતકાર્મુકં ત્રિપુરાર્તનિર્જરયાચિતં
    જ્યાકૃતાખિલસર્પરાજ મહીશતલ્પ સુસાયકમ્ ।
જ્યારથં ચતુરાગમાશ્વમજેન સારથિસંયુતં
    સંહૃતત્રિપુરં મહીધ્રસુતાનુ મોદકમાશ્રયે ॥ ૬॥

ગદાભૃદ્બ્રહ્મેન્દ્રાદ્યખિલ સુરવૃન્દાર્ચ્ય ચરણં

દદાનં ભક્તેભ્યશ્ચિતિમખિલ રૂપામનવધિમ્ ।
પદાસ્પૃષ્ટોક્ષાનં જિતમનસિજં શાન્તમાનસં
સદા શમ્ભું વન્દે શુભદગિરિજાશ્લિષ્ટવપુષમ્ ॥ ૭॥

ઇતિ શ્રીજગદ્ગુરુ શ્રીશ‍ૃઙ્ગેરીપીઠાધિપ શ્રીચન્દ્રશેખરભારતી
શ્રીપાદૈઃ વિરચિતં શ્રીતાણ્ડવેશ્વરસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Tandaveshvara Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*